M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref. / Ser. 1524

Title: Taittiriya Upanishad

1524

C

	Taitirya Upnishad	Incomplete	Title
			Author
			Editor
			Year, Vols.
SIC			Publisher
1524			Remarks

महइत्यादित्यः॥आदित्येनवावसर्वेलोकामहीयंते॥भू
रितिवाअग्निः॥भुवइतिवायुः॥सुवरित्यादित्यः॥मह
इतिचंद्रमाः॥चंद्रमसावावसर्वाणिज्योतीꣳषिमहीयं
ते॥भूरितिवाऋचः॥भुवइतिसामानि॥सुवरितियजू
ꣳषि॥२॥महइतिब्रह्म॥ब्रह्मणावावसर्वेवेदामहीयंते
॥भूरितिवैप्राणः॥भुवइत्यपानः॥सुवरितिव्यानः॥म
हइत्यन्नं॥अन्नेनवावसर्वेप्राणामहीयंते॥तावाएता
श्चतस्रश्चतुर्धा॥चतस्रश्चतस्रोव्याहृतयः॥तायोवे
द॥सवेदब्रह्म॥सर्वेस्मैदेवाबलिमावहंति॥३॥असौ

लोकोयजूंषि वेदद्वेचं ॥४॥ सयएषोंतर्हृदयआकाशः ॥

४ तस्मिन्नयंपुरुषोमनोमयः ॥ अमृतोहिरण्मयः ॥ अंतरेण

तालुके ॥ यएषस्तनइवावलंबते ॥ सेंद्रयोनिः ॥ यत्रासौकेशां

तोविवर्त्तते ॥ व्यपोह्यशीर्षकपाले ॥ भूरित्यग्नौप्रतितिष्ठति

भुवइतिवायौ ॥१॥ सुवरित्यादित्ये ॥ महइतिब्रह्मणि ॥ आ

प्नोतिस्वाराज्यं ॥ आप्नोतिमनसस्पतिं ॥ वाक्पतिश्चक्षुष्प

तिः ॥ श्रोत्रपतिर्विज्ञानपतिः ॥ एतत्ततोभवति ॥ आकाश

शरीरंब्रह्म ॥ सत्यात्मप्राणारामंमनआनंदं ॥ शांतिसमृ

द्धममृतं ॥ इतिप्राचीनयोग्योपास्व ॥२॥ वायावमृतमेकंच ४

॥५॥ पृथिव्यंतरिक्षंद्यौर्दिशोवांतरदिशाः ॥ अग्निर्वायुरादि

त्यश्चंद्रमानक्षत्राणि ॥ आपओषधयोवनस्पतयआकाश

आत्मा ॥ इत्यधिभूतं ॥ अथाध्यात्मं ॥ प्राणोव्यानोपानउ

दानःसमानः ॥ चक्षुःश्रोत्रंमनोवाक्त्वक् ॥ चर्ममांꣳसꣳ

स्नावास्थिमज्जा ॥ एतदधिविधायऋषिरवोचत् ॥ पाङ्क्तं

वाइदꣳसर्वं ॥ पाङ्क्तेनैवपाङ्क्तꣳस्पृणोतीति ॥१॥ सर्वमेकं

च ॥६॥ ओमितिब्रह्म ॥ ओमितीदꣳसर्वं ॥ ओमित्येतदनु

कृतिहस्मवाअप्योश्रावयेत्याश्रावयंति ॥ ओमितिसामा

निगायंति ॥ ओꣳशोमितिशास्त्राणिशꣳसंति ॥ ओमित्य

ध्वर्युः प्रतिगृरंप्रतिगृणाति॥ ओमिति ब्रह्मा प्रसौति॥ ओ
४ मित्यग्निहोत्रमनुजानाति॥ ओमिति ब्राह्मणः प्रवक्ष्यंना
हब्रह्मोपाप्नवानीति॥ ब्रह्मैवोपाप्नोति॥१॥ ओंदश॥९॥
ऋतंचस्वाध्यायप्रवचनेन॥ सत्यंचस्वाध्यायप्रवचनेन॥ त
पश्चस्वाध्यायप्रवचनेन॥ दमश्चस्वाध्यायप्रवचनेन॥ शम
श्चस्वाध्यायप्रवचनेन॥ अग्नयश्चस्वाध्यायप्रवचनेन॥ अ
ग्निहोत्रंचस्वाध्यायप्रवचनेन॥ अतिथयश्चस्वाध्यायप्रव
चनेन॥ मानुषंचस्वाध्यायप्रवचनेन॥ प्रजाचस्वाध्यायप्र
वचनेन॥ प्रजनश्चस्वाध्यायप्रवचनेन॥ प्रजातिश्चस्वाध्या ५

वास्यात्॥३॥ येतत्रब्राह्मणाः संमर्शिनः॥ युक्ताअयुक्ताः॥
अलूक्षाधर्मकामास्युः॥ यथातेतत्रवर्त्तेरन्॥ तथातत्रव
र्त्तेथाः॥ अथाभ्याख्यातेषु॥ येतत्रब्राह्मणाः संमर्शिनः॥
युक्ताअयुक्ताः॥ अलूक्षाधर्मकामास्युः॥ यथातेतेषुवर्त्ते
रन्॥ तथातेषुवर्त्तेथाः॥ एषआदेशः॥ एषउपदेशः॥ एषा
वेदोपनिषत्॥ एतदनुशासनं॥ एवमुपासितव्यं॥ एवमु
चैतदुपास्यं॥४॥ स्वाध्यायप्रवचनाभ्यांनप्रमदितव्यंता
नित्वयोपास्यानिस्यातेषुवर्त्तेरन्ससच॥१०॥ ॥ शन्नो
मित्रः शंवरुणः॥ शन्नोभवत्वर्यमा॥ शंनइन्द्रोबृहस्पतिः॥

८ शन्नो विष्णुरुरुक्रमः ॥ नमो ब्रह्मणे ॥ नमस्ते वायो ॥ त्वमेव प्र
त्यक्षं ब्रह्मासि ॥ त्वामेव प्रत्यक्षं ब्रह्मा वादिषं ॥ ऋतमवादिषं
सत्यमवादिषं ॥ तन्मामावीत् ॥ तद्वक्तारमावीत् ॥ आवीन्मां ॥
आवीद्वक्तारं ॥ ओं शांतिः शांतिः शांतिः ॥ ॥ शन्नः शीक्षा
ं सह नौ यश्छंदसां भूः सयः पृथिव्यमो मित्यृतं चाहं वेदमनू
च्य शन्नो द्वादश ॥ १२ ॥ हरिः ओम् ॥ शन्नो मित्रः शं वरुणः ॥
शन्नो भवत्वर्यमा ॥ शंन इंद्रो बृहस्पतिः ॥ शन्नो विष्णुरुरुक्र
मः ॥ नमो ब्रह्मणे ॥ नमस्ते वायो ॥ त्वमेव प्रत्यक्षं ब्रह्मासि ॥ त्व
मेव प्रत्यक्षं ब्रह्म वदि· अवतु वक्तारं ओं शांतिः शांतिः शांतिः ॥
श्रीगजाननार्पणमस्तु ॥ ॥ ८२ ॥ ॥ ७ ॥ ॥ ८

ष्पितस्य दूराद्गंधो वात्येवं पुण्यस्य कर्मणो दूराद्गंधो वाति य
थासिधारां कर्त्ते वहितामवक्रामे यद्यवे युवेहवा विह्वयिष्या
मि कर्त्तं पतिष्यामी त्येवममृताद् आत्मानं जुगुप्सेत् ॥ ११ ॥ अ
णोरणीयान्महतो महीयानात्मा गुहायां निहितोस्य जंतोः ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं ॥
सप्त प्राणाः प्रभवंति तस्मात्सप्तार्चिषः समिधः सप्त जिह्वाः ।
सप्त इमे लोका येषु चरंति प्राणा गुहाशया निहिताः सप्त स
प्त ॥ अतः समुद्रा गिरयश्च सर्वेस्मात्स्यंदंते सिंधवः सर्वरूपाः ।
अतश्च विश्वा ओषधयो रसाश्च येनैष भूतस्तिष्ठत्यंतरात्मा ॥

ब्रह्मादेवानांपदवीः कवीनामृषिर्विप्राणांमहिषोमृगाणां ॥ श्ये
१० नोगृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्रमत्येतिरेभन् ॥ अ
जामेकांलोहितशुक्लकृष्णांबह्वीं प्रजांजनयंतीꣳ सरूपां ॥ अजो
ह्येकोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्यः ॥१॥ हꣳ
सः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥
नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत् ॥
२ घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतमुवस्यधाम ॥ अ
नुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यं ॥ समुद्रा
दूर्मिर्मधुमाꣳ उदारदुपाꣳशुनासममृतत्वमानट् ॥ घृतस्य १०

नामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः ॥ वयंनाम
प्रब्रवामाघृतेनास्मिन्यज्ञेधारयामानमोभिः ॥ उपब्रह्मा
शृणवच्छस्यमानंचतुःशृंगोवमीद्गौरएतत् ॥ चत्वारिशृंगा
त्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृ
षभोरोरवीतिमहोदेवोमर्त्याꣳ आविवेश ॥२॥ त्रिधाहितं
पणिभिर्गुह्यमानंगविदेवासोघृतमन्वविंदन् ॥ इंद्रएकꣳ सू
र्यएकंजजानवेनादेकꣳ स्वधयानिष्टतक्षुः ॥ योदेवानांप्रथ
मंपुरस्ताद्विश्वाधियोरुद्रोमहर्षिः ॥ हिरण्यगर्भंपश्यतजा
यमानꣳ सनोदेवः शुभयास्मृत्यासंयुनक्तु ॥ यस्मात्परंना

परमस्तिकिंचिद्यस्मान्नाणीयोनज्यायोस्तिकश्चित् ॥ वृक्षइव
११ स्तब्धोदिविनिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणसर्वं ॥ नकर्मणान
प्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः ॥ परेणनाकंनिहि
तंगुहायांविभ्राजदेतद्यतयोविशंति ॥ वेदांतविज्ञानसुनि
श्चितार्थाः संन्यासयोगाद्यतयःशुद्धसत्वाः ॥ तेब्रह्मलोकेतु
परांतकालेपरामृतात्परिमुच्यंतिसर्वे ॥ दह्रंविपापंपरमेश्म
भूतंयत्पुंडरीकंपुरमध्यसंस्थं ॥ तत्रापिदह्रंगगनंविशोक
स्तस्मिन्यदंतस्तदुपासितव्यं ॥ योवेदादौस्वरःप्रोक्तोवेदांतेच
प्रतिष्ठितः ॥ तस्यप्रकृतिलीनस्ययःपरःसमहेश्वरः ॥३॥ अ ११

खायामध्येपरमात्माव्यवस्थितः ॥ सब्रह्मसशिवःसहरिःसेंद्रः
सोक्षरःपरमस्वराट् ॥२॥ अपिवासंततापह्न ॥१३॥ आदित्यो
वाएषएतन्मंडलंतपतितत्रताऋचस्तदृचामंडलंसऋचां
लोकोथयएषएतस्मिन्मंडलेर्चिर्दीप्यतेतानिसामानिससा
म्नांलोकोथयएषएतस्मिन्मंडलेर्चिषिपुरुषस्तानियजूंषि
सयजुषामंडलंसयजुषांलोकःसैषात्रय्येवविद्यातपतिय
एषोंतरादित्येहिरण्मयःपुरुषः ॥१४॥ आदित्योवैतेजओजो
बलंयशश्चक्षुःश्रोत्रमामन्युर्मनुत्मामनोमृत्युःसत्योमित्रो
वायुराकाशःप्राणोलोकपालःकःकिंकंतत्सत्यमन्नममृतो

१३ जीवोविश्वः कतमः स्वयंभुब्रह्मैतदमृतएषपुरुषएषभूताना
मधिपतिर्ब्रह्मणः सायुज्यं सलोकतामाप्नोत्येतासामेव
देवतानां सायुज्यं सार्ष्टितां समानलोकतामाप्नोतिय
एवंवेदेत्युपनिषत् ॥१५॥ निधनपतयेनमः ॥ निधनपान्तांति
कायनमः ॥ ऊर्ध्वायनमः ॥ ऊर्ध्वलिंगायनमः ॥ हिरण्यायन
मः ॥ हिरण्यलिंगायनमः ॥ सुवर्णायनमः ॥ सुवर्णलिंगायन
मः ॥ दिव्यायनमः ॥ दिव्यलिंगायनमः ॥ भवायनमः ॥ भवलिं
गायनमः ॥ शर्वायनमः ॥ शर्वलिंगायनमः ॥ शिवायनमः ॥ शि
वलिंगायनमः ॥ ज्वलायनमः ॥ ज्वललिंगायनमः ॥ आत्माय १३

१५ तुपृथिवीपृथिवीपूतापुनातुमां ॥ पुनंतुब्रह्मणस्पतिर्ब्रह्मपूता
पुनातुमां ॥ यदुच्छिष्टमभोज्यंयद्वादुश्चरितंमम ॥ सर्वंपुनंतु
मामापोसतांचप्रतिग्रहं स्वाहा ॥३०॥ अग्निश्चमामन्युश्चम
न्युपतयश्चमन्युकृतेभ्यः ॥ पापेभ्योरक्षंतां ॥ यदन्हापापमकार्षं
॥ मनसावाचाहस्ताभ्यां ॥ पद्भ्यामुदरेणशिश्ना ॥ अहस्तदवलुं
पतु ॥ यत्किंचदुरितंमयि ॥ इदमहंमाममृतयोनौ ॥ सत्येज्योति
षिजुहोमिस्वाहा ॥३१॥ सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृ
तेभ्यः ॥ पापेभ्योरक्षंतां ॥ यद्रात्रियापापमकार्षं ॥ मनसावाचा
हस्ताभ्यां ॥ पद्भ्यामुदरेणशिश्ना ॥ रात्रिस्तदवलुंपतु ॥ यत्किंच १५

[illegible] रुद्रस्तस्मै रुद्रायनमोअस्तु ॥२५॥ यस्यवैकंकत्यग्निहो
त्रहवणीभवतिप्रत्येवास्याहुतयस्तिष्ठंत्यथोप्रतितिष्ठत्यै ॥२६
कृणुष्वपाजइतिपंच ॥२७॥ अदितिर्देवागंधर्वामनुष्याःपित
रोसुरास्तेषांसर्वभूतानांमातामेदिनीमहतामहीसावित्री
गायत्रीजगत्युर्वीपृथ्वीबहुलाविश्वाभूताकतमायाकासास
त्यत्यमृतेतिवसिष्ठः ॥२८॥ आपोवाइदंसर्वंविश्वाभूतान्या
आ पःप्राणावापःपशवआपोन्नमापोमृतमापःसंम्राडापोविराडा
पःस्वराडापःछंदांस्यापोज्योतींष्यापोयजूंष्यापःसत्य
मापःसर्वादेवताआपोभूर्भुवःसुवरापओम् ॥२९॥ आपःपुनं

वाहयामिछंदर्षीनावाहयामित्रि[illegible]यमावाहयामिगायत्रिया
गायत्रीछंदोविश्वामित्रऋषिःसवितादेवताग्निर्मुखंब्रह्माशि
रोविष्णुर्हृदयंरुद्रःशिखापृथिवीयोनिःप्राणापानव्यानोदा
नसमानासप्राणाश्वेतवर्णासांख्यायनसगोत्रागायत्रीचतु
१६ र्विंशत्यक्षरात्रिपदाषट्कुक्षिःपंचशीर्षोपनयनेविनियोग
ओंभूः। ओंभुवः॥ ओंसुवः॥ ओंमहः॥ ओंजनः॥ ओंतपः॥
ओंसत्यं॥ ओंतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि। धियो
योनःप्रचोदयात्॥ ओमापोज्योतीरसोमृतंब्रह्मभूर्भुवःसुव
रोम् ॥३५॥ उत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि॥ ब्राह्मणो

[illegible]

दुरितंमयि॥इदमहंमामम्रुतयोनौ॥सूर्येज्योतिषिजुहोमिस्वा
हा॥३२॥ओमित्येकाक्षरंब्रह्म॥अग्निर्देवताब्रह्मइत्यार्षं॥
गायत्रंछंदंपरमात्मंसरूपं॥सायुज्यंविनियोगं॥३३॥आया
तुवरदादेवीअक्षरंब्रह्मसंमितं॥गायत्रीछंदसांमातेदंब्रह्मजु
षस्वमे॥यदन्हात्कुरुतेपापंतदन्हात्प्रतिमुच्यते॥यद्रात्रिया
त्कुरुतेपापंतद्रात्रियात्प्रतिमुच्यते॥सर्ववर्णेमहादेविसंध्या
विद्येसरस्वति॥३४॥ओजोसिसहोसिबलमसिभ्राजोसिदे
वानांधामनामासिविश्वमसिविश्वायुःसर्वमसिसर्वायुरभि
भूरोंगायत्रीमावाहयामिसावित्रीमावाहयामिसरस्वतीमा

२१

हा॥६२॥तिलांजुहोमिसरसांःसपिष्टान्गंधारममचित्तेरमंतु
स्वाहा॥गावोहिरण्यंधनमन्नपानंःसर्वेषांःश्रियैस्वाहा॥श्रि
यंचलक्ष्मिंचपुष्टिंचकीर्त्तिंचानृण्यतां॥ब्रह्मण्यंबहुपुत्रतां॥श्र
द्धामेधेप्रजाःसंददातुस्वाहा॥६३॥तिलाःकृष्णास्तिलाःश्वेता
स्तिलाःसौम्यावशानुगाः॥तिलाःपुनंतुमेपापंयत्किंचिद्दुरितं
मयिस्वाहा॥चोरस्यान्नंनवश्राद्धंब्रह्महागुरुतल्पगः॥गोस्ते
यंःसुरापानंभ्रूणहत्यातिलाशांतिःशमयंतुस्वाहा॥श्रीश्च
लक्ष्मीश्चपुष्टीश्चकीर्त्तिंचानृण्यतां॥ब्रह्मण्यंबहुपुत्रतां॥श्र
द्धामेधेप्रज्ञातुजातवेदःसंददातुस्वाहा॥६४॥प्राणापानव्या २१

वयजेनमसिस्वाहा ॥ यद्विद्वाꣳसश्चाविद्वाꣳसश्चैनश्चकृमनस्या
वयजेनमासिस्वाहा ॥ एनसएनसोवयजेनमसिस्वाहा ॥ ५९ ॥
यद्वोदेवाश्चकृमजिह्वयागुरुमनसोवाप्रयुतीदेवहेडनं ॥ अ
रावायोनोअभिदुच्छुनायतेतस्मिन्तदेनोवसवानिधेतन
स्वाहा ॥ ६० ॥ कामोकार्षीन्नमोनमः ॥ कामोकार्षीत्कामःक
रोतिनाहंकरोमिकामःकर्त्तानाहंकर्त्ताकामः कारयितानाहं
कारयिताएषतेकामकामायस्वाहा ॥ ६१ ॥ मन्युरकार्षीन्न
मोनमः ॥ मन्युरकार्षीन्मन्युःकरोतिनाहंकरोमिमन्युःकर्त्ता
नाहंकर्त्तामन्युःकारयितानाहंकारयिताएषतेमन्योमन्यवेस्वा

२१ स्तकमामाहिꣳसीः ॥ ७२ ॥ वयःसुपर्णाउपसेदुरिन्द्रंप्रियमे
धाऋषयोनाधमानाः ॥ अपध्वांतमूर्णुहिपूर्धिचक्षुर्मुमु
ग्ध्यस्मांनिधयेवबद्धान् ॥ ७३ ॥ प्राणानांग्रंथिरसिरुद्रोमा
विशांतकः ॥ तेनान्नेनाप्यायस्व ॥ ७४ ॥ नमोरुद्रायविश्वे
मृत्युर्मेपाहि ॥ ७५ ॥ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यः
स्त्वमश्मनस्परि ॥ त्वंवनेभ्यःस्त्वमोषधीभ्यःस्त्वंनृणांनृपते
जायसेशुचिः ॥ ७६ ॥ शिवेनमेसंतिष्ठस्वस्योनेनमेसंतिष्ठ
स्वसुभूतेनमेसंतिष्ठस्वब्रह्मवर्चसेनमेसंतिष्ठस्वयज्ञस्यर्धि
मनुसंतिष्ठस्वोपतेयज्ञनमउपतेनमउपतेनमः ॥ ७७ ॥ सत्यंप २५

श्रद्धायां प्राणेनिविश्यामृतं हुतं॥ प्राणमन्नेनाप्यायस्व॥
श्रद्धायामपानेनिविश्यामृतं हुतं॥अपानमन्नेनाप्यायस्व॥
श्रद्धायां व्यानेनिविश्यामृतं हुतं॥ व्यानमन्नेनाप्यायस्व॥
श्रद्धायामुदानेनिविश्यामृतं हुतं॥उदानमन्नेनाप्यायस्व॥
श्रद्धायां समानेनिविश्यामृतं हुतं॥समानमन्नेनाप्यायस्व॥
॥७०॥अंगुष्ठमात्रः पुरुषोंगुष्ठंचसमाश्रितः॥ ईशः सर्वस्य
जगतः प्रभुप्रीणातिविश्वभुक्॥७१॥ वाङ्म आसन्॥ नसोः
प्राणः॥ अक्ष्योःश्चक्षुः॥ कर्णयोश्रोत्रं॥ बाहुवोर्बलं॥ऊरु
रोजः॥ अरिष्टाविश्वान्यंगानितनूः॥ तनुवामेसहनमस्ते
न।

मनोव्यक्तात्माअंतरात्मापरमात्मामेक्षुधेनमयपंचदशाग्नये
स्वाहैकचत्वारिंशद्दांतब्रह्मनवः श्रद्धायां प्राणे निविष्टश्च
तुर्विंशातिः श्रद्धायां दशांगुष्ठमात्रः पुरुषोद्वेवाङ्म आसन्
द्वौवयः सुपर्णाप्राणानां ग्रंथिरसिद्वेद्वे नमोरुद्रायैकंत्वमग्ने
ध्रुभिर्द्वेशिवेनमेसंतिष्ठस्वसत्यं प्राँपत्यस्तस्यैवमेकमेकंशा
तिः॥८०॥ ॥सहनाववतु॥सहनौभुनक्तु॥सहवीर्यंक
रवावहै॥तेजस्विनावधीतमस्तु माविद्विषावहै॥ओंशां
तिः शांतिः शांतिः॥हरिःओंम्॥ ॥श्रीकृष्णार्पणमस्तु॥
शाके१७४५ सुभानुसंवत्वैशाखकृष्ण १४ मंदवासरेसंपूर्णं॥

३९

३९